श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्व्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्व्यधिकशततमः सर्गः ॥

### इन्द्रप्रहितं रथमारूढस्य रामस्य रावणेन सह युद्धम्

लक्ष्मणेन तु तद् वाक्यमुक्तं श्रुत्वा स राघवः।
सन्दधे परवीरघ्नो धनुरादाय वीर्यवान् ॥ **6.102.1** ॥

रावणाय शरान् घोरान् विससर्ज चमूमुखे।
अथान्यं रथमास्थाय रावणो राक्षसाधिपः ॥ **6.102.2** ॥

अभ्यधावत काकुत्स्थं स्वर्भानुरिव भास्करम्।
दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः।
आजघान महाशैलं धाराभिरिव तोयदः ॥ **6.102.3** ॥

दीप्तपावकसङ्काशैः शरैः काञ्चनभूषणैः।
अभ्यवर्षद् रणे रामो दशग्रीवं समाहितः ॥ **6.102.4** ॥

भूमौ स्थितस्य रामस्य रथस्थस्य स रक्षसः।
न समं युद्धमित्याहुर्देवगन्धर्वकिन्नराः ॥ **6.102.5** ॥

ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचोऽमृतम्।
आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ॥ **6.102.6** ॥

रथेन मम भूमिष्ठं शीघ्रं याहि रघूत्तमम्।
आहूय भूतलं यातः कुरु देवहितं महत् ॥ **6.102.7** ॥

इत्युक्तो देवराजेन मातलिर्देवसारथिः।
प्रणम्य शिरसा देवं ततो वचनमब्रवीत्॥ **6.102.8**॥

शीघ्रं यास्यामि देवेन्द्र सारथ्यं च करोम्यहम्।
ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम्॥ **6.102.9**॥

ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः।
तरुणादित्यसङ्काशो वैदूर्यमयकूबरः।
सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः॥ **6.102.10**॥

हरिभिः सूर्यसङ्काशैर्हेमजालविभूषितैः।
रुक्मवेणुध्वजः श्रीमान् देवराजरथो वरः॥ **6.102.11**॥

देवराजेन सन्दिष्टो रथमारुह्य मातलिः।
अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात्॥ **6.102.12**॥

अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः।
प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः॥ **6.102.13**॥

सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते।
दत्तस्तव महासत्त्व श्रीमञ्शत्रुनिबर्हण॥ **6.102.14**॥

इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम्।
शराश्चादित्यसङ्काशाः शक्तिश्च विमला शिवा॥ **6.102.15**॥

आरुह्येमं रथं वीर राक्षसं जहि रावणम्।
मया सारथिना देव महेन्द्र इव दानवान्॥ **6.102.16**॥

इत्युक्तः सम्परिक्रम्य रथं तमभिवाद्य च।
आरुरोह तदा रामो लोकान् लक्ष्म्या विराजयन्॥ **6.102.17**॥

तद् बभौ चाद्भुतं युद्धं द्वैरथं रोमहर्षणम्।
रामस्य च महाबाहो रावणस्य च रक्षसः॥ **6.102.18** ॥

स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः।
अस्त्रं राक्षसराजस्य जघान परमास्त्रवित्॥ **6.102.19** ॥

अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः।
ससर्ज परमक्रुद्धः पुनरेव निशाचरः॥ **6.102.20** ॥

ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः।
अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः॥ **6.102.21** ॥

ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः।
राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः॥ **6.102.22** ॥

तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः।
दिशश्च सन्तताः सर्वा विदिशश्च समावृताः॥ **6.102.23** ॥

तान् दृष्ट्वा पन्नगान् रामः समापतत आहवे।
अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम्॥ **6.102.24** ॥

ते राघवधनुर्मुक्ता रुक्मपुङ्खाः शिखिप्रभाः।
सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः॥ **6.102.25** ॥

ते तान् सर्वाञ्शराञ्जघ्नुः सर्परूपान् महाजवान्।
सुपर्णरूपा रामस्य विशिखाः कामरूपिणः॥ **6.102.26** ॥

अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः।
अभ्यवर्षत् तदा रामं घोराभिः शरवृष्टिभिः॥ **6.102.27** ॥

ततः शरसहस्रेण राममक्लिष्टकारिणम्।
अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत॥ **6.102.28** ॥

चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः।
पातयित्वा रथोपस्थे रथात् केतुं च काञ्चनम्॥ **6.102.29**॥

ऐन्द्रानपि जघानाश्वाञ्शारजालेन रावणः।
विषेदुर्देवगन्धर्वचारणा दानवैः सह॥ **6.102.30**॥

राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः।
व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः॥ **6.102.31**॥

रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा।
प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम्॥ **6.102.32**॥

समाक्रम्य बुधस्तस्थौ प्रजानामहितावहः।
सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः॥ **6.102.33**॥

उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम्।
शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः॥ **6.102.34**॥

अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना।
कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम्॥ **6.102.35**॥

आहत्याङ्गारकस्तस्थौ विशाखमपि चाम्बरे।
दशास्यो विंशतिभुजः प्रगृहीतशरासनः॥ **6.102.36**॥

अदृश्यत दशग्रीवो मैनाक इव पर्वतः।
निरस्यमानो रामस्तु दशग्रीवेण रक्षसा॥ **6.102.37**॥

नाशक्नोदभिसन्धातुं सायकान् रणमूर्धनि।
स कृत्वा भ्रुकुटिं क्रुद्धः किञ्चित् संरक्तलोचनः॥ **6.102.38**॥

जगाम सुमहाक्रोधं निर्दहन्निव राक्षसान्।
तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः।
सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी॥ **6.102.39**॥

सिंहशार्दूलवाञ्छैलः सञ्चचाल चलद् द्रुमः।
बभूव चापि क्षुभितः समुद्रः सरितां पतिः॥ **6.102.40**॥

खराश्च खरनिर्घोषा गगने परुषा घनाः।
औत्पातिकाश्च नर्दन्तः समन्तात् परिचक्रमुः॥ **6.102.41**॥

रामं दृष्ट्वा सुसङ्क्रुद्धमुत्पातांश्चैव दारुणान्।
वित्रेसुः सर्वभूतानि रावणस्याभवद् भयम्॥ **6.102.42**॥

विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः।
ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः॥ **6.102.43**॥

ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितम्।
नानाप्रहरणैर्भीमैः शूरयोः सम्प्रयुध्यतोः॥ **6.102.44**॥

ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः।
प्रेक्षमाणा महायुद्धं वाक्यं भक्त्या प्रहृष्टवत्॥ **6.102.45**॥

दशग्रीवं जयेत्याहुरसुराः समवस्थिताः।
देवा राममथोचुस्ते त्वं जयेति पुनः पुनः॥ **6.102.46**॥

एतस्मिन्नन्तरे क्रोधाद् राघवस्य च रावणः।
प्रहर्तुकामो दुष्टात्मा स्पृशन् प्रहरणं महत्॥ **6.102.47**॥

वज्रसारं महानादं सर्वशत्रुनिबर्हणम्।
शैलशृङ्गनिभैः कूटैश्चित्तदृष्टिभयावहम्॥ **6.102.48**॥

सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम्।
अतिरौद्रमनासाद्यं कालेनापि दुरासदम्॥ **6.102.49** ॥

त्रासनं सर्वभूतानां दारणं भेदनं तथा।
प्रदीप्त इव रोषेण शूलं जग्राह रावणः॥ **6.102.50** ॥

तच्छूलं परमक्रुद्धो जग्राह युधि वीर्यवान्।
अनीकैः समरे शूरै राक्षसैः परिवारितः॥ **6.102.51** ॥

समुद्यम्य महाकायो ननाद युधि भैरवम्।
संरक्तनयनो रोषात् स्वसैन्यमभिहर्षयन्॥ **6.102.52** ॥

पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा।
प्राकम्पयत् तदा शब्दो राक्षसेन्द्रस्य दारुणः॥ **6.102.53** ॥

अतिकायस्य नादेन तेन तस्य दुरात्मनः।
सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे॥ **6.102.54** ॥

स गृहीत्वा महावीर्यः शूलं तद् रावणो महत्।
विनद्य सुमहानादं रामं परुषमब्रवीत्॥ **6.102.55** ॥

शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः।
तव भ्रातृसहायस्य सद्यः प्राणान् हरिष्यति॥ **6.102.56** ॥

रक्षसामद्य शूराणां निहतानां चमूमुखे।
त्वां निहत्य रणश्लाघिन् करोमि तरसा समम्॥ **6.102.57** ॥

तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव।
एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः॥ **6.102.58** ॥

तद् रावणकरान्मुक्तं विद्युन्मालासमावृतम्।
अष्टघण्टं महानादं वियद्गतमशोभत॥ **6.102.59** ॥

तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम्।
ससर्ज विशिखान् रामश्चापमायम्य वीर्यवान्॥ **6.102.60** ॥

आपतन्तं शरौघेण वारयामास राघवः।
उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः॥ **6.102.61** ॥

निर्ददाह स तान् बाणान् रामकार्मुकनिःसृतान्।
रावणस्य महाञ्शूलः पतङ्गानिव पावकः॥ **6.102.62** ॥

तान् दृष्ट्वा भस्मसाद्भूताञ्शूलसंस्पर्शचूर्णितान्।
सायकानन्तरिक्षस्थान् राघवः क्रोधमाहरत्॥ **6.102.63** ॥

स तां मातलिना नीतां शक्तिं वासवसम्मताम्।
जग्राह परमक्रुद्धो राघवो रघुनन्दनः॥ **6.102.64** ॥

सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना।
नभः प्रज्वालयामास युगान्तोल्केव सप्रभा॥ **6.102.65** ॥

सा क्षिप्ता राक्षसेन्द्रस्य तस्मिञ्छूले पपात ह।
भिन्नः शक्त्या महाञ्शूलो निपपात गतद्युतिः॥ **6.102.66** ॥

निर्बिभेद ततो बाणैर्हयानस्य महाजवान्।
रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैरजिह्मगैः॥ **6.102.67** ॥

निर्बिभेदोरसि तदा रावणं निशितैः शरैः।
राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः॥ **6.102.68** ॥

स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः।
राक्षसेन्द्रः समूहस्थः फुल्लाशोक इवाबभौ॥ **6.102.69** ॥

स रामबाणैरतिविद्धगात्रो
    निशाचरेन्द्रः क्षतजार्द्रगात्रः।

**जगाम खेदं च समाजमध्ये**
**क्रोधं च चक्रे सुभृशं तदानीम् ॥ 6.102.70 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्यधिकशततमः सर्गः ॥